# || नवग्रह स्तोत्र ||

Chalisamantras.com

। व्यासरचितं नवग्रह स्तोत्र पाठ ।

जपाकुसुम सङ्काशं काश्यपेयम् महदद्युतिम् ।
तमोरिंसर्वपापघ्नम् प्रणतोऽस्मि दिवाकरं । १ ।

दधिशङ्खतुषाराभं क्षीरोदार्णव संभवं ।
नमामि शशिनम् सोमं शंभोर्मुकुट भूषणं । २ ।

धरणीगर्भ संभूतम् विद्युत्कान्ति समत्प्रभम् ।
कुमारं शक्तिहस्तं तं मंगलम् प्रणाम्यहम् । ३ ।

प्रियंगुकलिकाश्यामम् रूपेणाप्रतिमं बुधं ।
सौम्यं सौम्य गुणोपेतं तं बुधम् प्रणमाम्यहम् । ४ ।

देवानांच ऋषीनांच गुरुं कांचन सन्निभम् ।
बुद्धिभूतं त्रिलोकेशम् तं नमामि बृहस्पतिं । ५ ।

हिमकुंद मृणालाभं दैत्यानाम् परमं गुरुम् ।
सर्वशास्त्र प्रवक्तारं भार्गवम् प्रणमाम्यहम् । ६ ।

नीलांजन समाभासम् रविपुत्रं यमाग्रजम् ।
छायामार्तन्ड संभूतं तं नमामि शनैश्चरम् । ७ ।

अर्धकायं महावीर्यं चन्द्रादित्य विमर्दनम् ।
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् । ८ ।

पलाशपुष्पसङ्काशं तारकाग्रह मस्तकं ।
रौद्रं रौद्रात्मकं घोरं तं केतुम् प्रणमाम्यहम् । ९ ।

इति श्री व्यासमुखोग्दीतं यः पठेत् सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्न शांतिर्भविष्यति । १० ।

नरनारी नृपाणांच भवेत् दुःस्वप्ननाशनं ।
ऐश्वर्यमतुलम् तेषाम् आरोग्यम् पुष्टिवर्धनं । ११ ।

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुभ्दवाः ।
ता सर्वाःप्रशमं यान्ति व्यासोब्रुते न संशयः । १२ ।

। इस प्रकार व्यास मुनि द्वारा रचित नवग्रह स्तोत्र पाठ पूरा हुआ ।

Chalisamantras.com

Chalisamantras.com